जय श्रीगुरवे नमः ॥

~०~

आलम्बे जगदालम्बं हेरम्ब चरणाम्बुजम् ।
शुष्यन्ति यद्रजस्पर्शात् सद्यः प्रत्यूहवारधयः

~०~

सर्वज्ञाः सर्वकर्तारो
ब्रह्माद्या भुवनेश्वराः ।
यत्रैते बुद्बुधायन्ते
बोधाब्धिं तं स्तुमः शिवम् ॥

~०~

ॐ

श्रीगुरवे नमः

श्रीरामेश्वराचार्यकृता श्रीगुरुस्तुतिः ।

—०—

गुरुशक्तिर्जयत्येका मद्रूपप्रविकासिका ।
स्वरूपगोपनव्यग्रा शिवशक्तिर्जिता यया ॥ 1

यस्य प्रसादादहमेव शम्भु-
र्यस्य प्रसादादहमीश्वरोऽस्मि ।
यस्य प्रसादादहमेव सर्व-
स्तस्मै नमः श्रीगुरवे शिवाय ॥ 2

शैवप्रजाः स्रष्टुमना महेशो
गुरुक्रमेऽमून्मनुदेवरूपः ।

स्तुमो गुरुं तं परमेष्ठिरूपं
साक्षाच्छिवं श्रीमनुदेवमेव ॥ 3
विकल्पशान्त्यर्थमिव प्रवृत्ता-
च्छास्त्रात्सदादूरतमस्वभावे ।
संवित्स्वभावे परिवर्तमानो
दृष्ट्यैव शिष्यानकरोत्स शंभून् ॥ 4
तत्सिद्धपादप्रभवत्प्रकाशो
माहेश्वरोऽवाप्तशिवात्मभावः ।
श्रीमानभूद्राम इति प्रसिद्धो
यो मद्गुरोः कल्मषरावणारि ॥ 5

ज्येष्ठोऽप्यसौ मद्गुरुजन्मजात-
हर्षोल्लसद्भिर्मृतदेहभावः ।
रामोऽस्म्यहं लक्ष्मण एष जात
इत्येव गायन् सहसा ननर्त ॥ 6

शिष्यान् समुद्बोधयितुं स नित्यं
सदातनं स्वस्य शिवस्वभावम् ।
प्रादर्शयद्देहगतं समक्षं
घोराश्चतस्रोऽधिगतः समाधिम् ॥ 7

कृत्यं विधेयस्य जनस्य शेषं
सप्ताब्दकल्पस्य च लक्ष्मणस्य ।

शिष्यप्रधानं महताबकाकं
निर्दिश्य सोऽगान्निजधाम शैवम् ॥ 8
न लक्षणं यस्य न योऽस्ति लक्ष्यः
षडध्वनो योऽस्ति च लक्ष्मभूतः ।
यो लक्ष्मणस्यैव च लक्ष्मणस्य
रामो गुरू राम इव स्तुमस्तम् ॥ 9
ऊर्जस्य शुक्ले च तिथौ चतुर्थ्यां
जगज्जिगीषून् स्वत ऊर्जयन्तः ।
आविर्बभूवुर्महताबकाकाः
काश्मीरकाणडाभिधजन्मभूमौ ॥ 10

तानद्य सर्वे वयमाविश्रान्तो
गुरून् स्मरन्तो मनसाथ वाचा ।
विशुद्धभक्त्या प्रणता नमामः ॥ 11
स्थितांश्च ज्ञानप्रभयागतानपि ॥
तज्ज्ञानगोत्रे गुरवश्चकासति
ज्ञानप्रभाभिः प्रसृताभिरद्य ।
श्रीलक्ष्मणाख्याः प्रणतां जनानां
दृष्ट्यैव दृष्टेः तमसां विघातकाः ॥ 12
बिभर्त्ति स्वस्मिन् स्वविमर्शशक्त्या
सर्गस्थितिध्वंसमनारतं यः ।

तमच्छमच्छन्नमनन्तरूपं
श्रीलक्ष्मणारण्यं प्रणमामि वन्द्यम् ॥ 13

प्रकाशरूपस्य चिदात्मनस्ते
स्वातन्त्र्यमेतन्नहि किंचिदन्यत् ।
शिवादिपृथ्व्यन्तसमस्तविश्व-
रूपेण चैकोऽपि विभासि यत्त्वम् ॥ 14

त्वय्येव मातः स्मृतिविस्मृती ते
द्वयोरपि त्वं स्वयमेव भासि ।
तथापि सांमुख्यसुखाभिवर्षिणी
स्मृतिः प्रिया ते नहि विस्मृतिर्मे ॥ 15

वाचा कया त्वामहमीशमीडे
प्रसादये त्वां क्रियया कया वा ।
यतः सदान्तर्मुखभास्वरूपो
न मायिकं पश्यसि किंचिदेतत् ॥ 16

स्तुवन्नपि त्वामहमेमि सद्यः
परामृताधायि चमत्कृतिं ते ।
तथाप्यविच्छिन्नसुखैकधाम
याचे स्वभावं त्वदकृत्रिमं तम् ॥ 17

तस्याप्रतर्क्यविभवस्य महेश्वरस्य
पादौ नमामि नयनामृतलक्ष्मणस्य ।

देवस्य यस्य महतः करुणाकटाक्षै-

रालोकितोऽहमिह विश्ववपुर्विभामि ॥१८

प्रत्यात्ममूर्तः परमात्मरूपो

नित्यः शिवः सर्वसुलक्षणोऽसि ।

लोकैरलक्ष्यो विदुषामिलक्ष्यो

विलक्षणो लक्ष्मण उच्यसे त्वम् ॥१९

अनन्तशास्त्रोदधिमन्थनाप्यं

17 Sunday यदात्मतत्त्वं परमामृताख्यम् ।

तद्दर्शिणी यस्य कृपाङ्गदृष्टिः

स त्वं शरण्यः शरणं ममासि ॥२०

शिष्याननेकान् जगतः समुद्धर-
न्नासीत्पुरा गुप्तगुरुर्गरीयान् ।
यो लक्ष्मणो लक्ष्मणा एष नो गुरुः
पायात्समस्तान् शरणागतान् सः ॥ २१

शिवस्वरूपोऽपि जगत्स्वरूपः
स्वात्मस्वरूपोऽपि परस्वरूपः ।
नित्योऽपि यो नित्यमनित्यरूप-
स्तस्मै नमः श्रीगुरवेऽद्भुताय ॥२२

दृष्टप्रभावं परिमुच्य देवं
स्तूयात्कथं दासजनः परेशम् ।

युष्मत्कृपापाङ्गनिपीतपापा

भवन्ति सद्यः पशवो महेशाः ॥ 23

किं वर्णयामो महताञ्च तेषां

भाग्यं भवत्पादरजोऽनुरागिणाम् ।

पुण्यातिसंभारशतैरदृश्यो

येषां भवान् दृक्पथगोचरः शिवः ॥ 24

श्रीगुरुं तमहं वन्दे कारुण्यरसनिर्भरम् ।

स्वात्मभूतं जगद्भाति यत्कृपापाङ्गपाततः ॥ 25

नुमः शारिकया जुष्टं प्रभया परिपूजितम् ।

गुरुरूपधरं देवं लक्ष्मणं शान्तविग्रहम् ॥ 26

जयत्येको जगत्यस्मिन् गुरुर्भे भोगमोक्षदः ।
मोक्षलक्ष्मीसमाश्लिष्टो जन्मतो यश्च लक्ष्मणः ॥ 27

नमः श्रीमद्धंसे तस्मै स्वात्मसाम्राज्यदायिने ।
भवबन्धच्छिदे दृष्ट्या नररूपाय शूलिने ॥ 28

वाचा दृशा तथा कृत्या स्वानन्दरसपूर्णया ।
आह्लादं परमं यच्छन् गुरुः केनोपमीयताम् ॥ 29

निखिलैरिन्द्रियैरेभिर्भिन्नवेद्यप्रदर्शिभिः ।
दर्शितः शिव एवैको येन तस्मै नमो नमः ॥ 30

स्वानन्दरसकल्लोलैरुल्लसन्नस्म्यहर्निशम् ।
यद्दृष्टिपरिपूतोऽहमाश्रये तत्पदद्वयम् ॥ 31

स्वात्मावमर्शसंलग्ना परासहितवैखरी ।
कृता येन गुरोस्तस्य वाचा कुर्य्यां स्तुतिं मया ॥ 32
गुरुस्तुतिपरैवेयं परासहितवैखरी ।
इत्येवं जानतो मे वाक् का न स्तौति गुरुं कदा ॥ 33
शाङ्करी शुद्धविद्येव पूर्णाकारुण्यनिर्भरा ।
सर्वैश्वर्यप्रदा देवी जयति श्रीगुरुकृपा ॥ 34
नमो गुरुं महाकालजन्मग्रामावभासकम् ।
स्वातन्त्र्योद्भासिताशेषघस्मरं लक्ष्मणं प्रभुम् ॥ 35
दीनोद्धारैककृत्याय करुणागाधसिन्धवे ।
अनेकशीलसत्काय लक्ष्मणाय नमस्तमाम् ॥ 36

यस्यां च सत्यामहमेव भामि
सर्वात्मना सर्वविकल्पहीनः ।
यत्नैरलभ्यामतिदुर्लभां तां
श्रीसद्गुरोर्नौमि दयार्द्रदृष्टिम् ॥37

आज्ञा यदीया तु कृपात्मिकैव
स्पन्दात्मिका कालकलाव्यतीता ।
उन्मेषनामास्ति निमेषगर्भा
बिन्द्वात्मिका नादकलास्वरूपा ॥38

विमर्शरूपा समनात्मिका या
प्रकाशजातापि तदात्मिकैव ।

तं नौमि देवं विदुषां वरेण्यं
श्रीलक्ष्मणं व्यक्तसमस्तलक्षणम् ॥
(युग्लकम्) 39

द्रष्टुं स्वकीयपदपंकजमद्वितीय-
दृष्टिस्त्वयैव विहिताऽत्र न संशयो मे ।
किन्तु प्रभो ! यदनयैव समस्तविश्वं
पश्याम्यतः सकलमेव भवत्स्वरूपम् ॥ 40

आमोदयन्ति हृदयं परितः परागाः
पीयूषवर्षिकिरणो रसयन्ति चन्द्राः ।
देव ! त्वदीयपदपंकजमेति यस्य
स्वान्ते तु तस्य मधुराश्च दिशो भवन्ति ॥ 41

जानाति सौख्यं पदपंकजस्य
चेतो मदीयं न भवानधीश ।
मुक्त्वा द्विरेफं मकरन्दसौख्यं
न वेत्तुमीष्टे कमलाकरोऽपि ॥ 42

अनन्तजन्मार्जितपुण्यराशेः
फलंत्वदीयस्मृतिगोचरत्वम् ।
लब्धस्य मे देव ! सदैव चेतो
विलोकितुं वांछति तेऽङ्घ्रिपद्मम् ॥ 43

देव ! त्वदीयकरुणावरुणालयस्य
कल्लोलशीकरसुसेचनशांततृष्णाः ।

नीतस्त्वया धृतकरोऽन्ध इवाहमीश !
संकल्पपंकरहिते सुपथि प्रयामि ॥ ५५

क्रियां च कालं करणं कलां च
योऽपेक्षते कृत्यविधौ न किंचित् ।
कुर्वन्न चाप्नोति च कर्तृभावं
नुमो गुरुं तं करुणैकमूर्तिम् ॥ ५५

ब्रह्मामृतास्वादशिवस्वभावः
स्वीयस्वभावो भवति प्रसह्य ।
पूतस्य ते देव ! कृपाकटाक्षै-
र्भवोऽपि स्वोद्भूततया विभाति ॥ ५६

हन्त्री विधात्री जगतोऽपि कर्त्री
कृपैव ते नैव जनस्य बुद्धिः ।
सर्वार्त्तिहन्त्री भवदङ्घ्रिभक्तिः
सापि प्रभो ! त्वत्कृपया भवित्री ॥ 57

नित्यापरोक्षं तव देव रूपं
प्रकाशमानं परितः पुरस्तात् ।
सर्वादि चाद्यन्तविहीनमेवं
पश्यामि देव ! कृपया तवैव ॥ 58

स्वाराज्यसाम्राज्यपदप्रदायिने
नित्याय शांताय परापरात्मने ।

कारुण्यपूर्णामृतवर्षिहृद्ये
श्रीदेशिकायामिततेजसे नमः ॥ ५९

स्तोतुं त्वां कः समर्थोऽस्ति प्राणबुद्धिप्रवर्तकम्।
किन्तु प्रभोः प्रसादार्थं ममैतद्वाग्विजृम्भणम्। 50
किं न दत्तं त्वया मह्यं दर्शितं किं न मां पुनः।
तव स्तुतिपरैवेयं वाणी मे भवतात्प्रभो ॥ 51
कुत्र नासि कदा नासि भाति किं वा त्वया विना।
स्थितं देवं नमस्यामि सेयमर्चा परा मम ॥ 52

न यत्र वाणी न मनोऽपि यस्मिन्
गुरौ कथञ्चित्क्रमते विशुद्धे ।

कथं स्तुतिस्तस्य भवेत्परं स
भक्तार्थमद्यास्ति गृहीतरूपः ॥ 53

येन मानमितिमेयमानतः
संनिवर्त्य निजवैभवे शिवे ।
स्थापितोऽस्मि कृपयावलोकित-
स्तं नतोऽस्मि गुरुमेव लक्ष्मणम् ॥ 54

सद्यः प्रपन्नजनताहृदयाम्बुजन्म
संबोधयत्यखिलविश्वभयच्छिदे यत् ।
तद्देशिकाङ्घ्रिजमहो मिहिरायमाणं
शश्वच्चकास्तु सबलाकृति शाश्वतं नः ॥
55

हृदम्बुजदिनेशाय मोहारण्यदवाग्नये ।

शान्तिरात्रिमृगाङ्काय चिद्रूपगुरवे नमः ॥ 56

उपायवनचैत्राय शिवाय शिवयोगिनाम् ।

भाविनां भुक्तिमुक्त्यर्थं कल्पवृक्षाय ते नमः ॥ 5

स्वात्मविश्रांतिदं यस्य दर्शनं भवतापहम् ।

नमस्तस्मै स्वतन्त्राय पारतन्त्र्यविनाशिने ॥ 5

आद्यन्तहीनोऽस्ति विभोर्हि यस्य

31 Sunday भातं समस्तं भवमश्नुवानः ।

संकोचशून्यप्रसरत्प्रकाशः

स मे गुरुः केन कथं स्तुतः स्यात् ॥ 59

वाचा निर्मलया सुधामधुरया दृष्ट्या च शिष्यान्निजा-
नुद्धर्तुं नरविग्रहीव रमते यः स्वात्मसंस्थः शिवः ।
तं वन्दे परमप्रकाशनिबिडं स्वेच्छास्फुरद्विग्रहं
कारुण्याम्बुनिधिं महागुरुवरं श्रीलक्ष्मणं सर्वदम् ॥ 60
शश्वच्छांतिसमावृतोऽपि विषयैरेभिर्निजोद्भासितै-
र्हासोल्लासविलासकौतुकपरः स्वस्मिन्समन्तात्स्थितः ।
यश्चैतन्यसुधानिधिर्विजयते देवः स एको गुरु-
र्विद्वन्मानसपुष्करप्रविततज्ञानप्रभो लक्ष्मणः ॥ 61
पूज्यः श्रीगुरुराजलक्ष्मणशिवः काशमीरदेशस्थितो
भातु ध्वान्तनिवारको भुवि नृणां चित्ते स शान्तिप्रदः ।

आसीदस्ति भवत्यपि प्रतिदिनं यो लीलया सन्ततं
स्वच्छः स्वाद्भुतशक्तिचक्रविभवस्त्रैलोक्यमेतज्जगत् ॥ 6
वाणी यस्य सुनिर्मलातिसरसा तापत्रयोज्जासने
यद्दृष्टिं करुणाभरां नतजनोद्धारे परिस्पर्धते ।
यत्रैकापि नतिर्ददाति सकलं साम्राज्यमत्यद्भुतं
तत्रैवास्तु महेश्वरे मम गुरौ श्रीलक्ष्मणे मे रतिः 6

श्रीगुरुपदनखजन्मा
जन्मान्धस्यापि प्रकाशयन्नर्थान् ।
स जयति कोऽपि विकासः
प्रकाशमानोऽनवच्छिन्नः ॥

विनाशिताशेषविकल्पबुद्ध्य-
हंरूपमन्त्रार्थविकासिकाभ्याम् ।
देहाद्यहंकारनिवर्तिकाभ्यां
नमो नमः श्रीगुरुपादुकाभ्याम् ॥
उद्घाटिताद्वैतमहेक्षणाभ्यां
निमीलितद्वैतविलोचनाभ्याम् ।
मोहान्धकारेऽपि विरोचनाभ्यां
नमो नमः श्रीगुरुपादुकाभ्याम् ॥

उद्गीर्णरागप्रतिरोधकाभ्यां
विलीनबोधप्रतिबोधिकाभ्याम् ।
अनादिमायामलवारिकाभ्यां
नमो नमः श्रीगुरुपादुकाभ्याम् ॥
अम्बादिरौद्र्यन्तमरीचिकाभ्यां
वर्णादिसर्वाध्वविवर्त्तिकाभ्याम् ।
इच्छादिदेवीततचन्द्रिकाभ्यां
नमो नमः श्रीगुरुपादुकाभ्याम् ॥

संसारदावानलघोरताप-
शान्त्यर्थपीयूषमहाह्लदाभ्याम् ।
आप्यायितस्मर्तृ जनव्रजाभ्यां
नमो नमः श्रीगुरुपादुकाभ्याम् ॥
समस्तविद्योदधिसारदाभ्यां
श्रीशारिकास्वान्तसुसेविताभ्याम् ।
सच्छिष्यवृन्दैः परिपूजिताभ्यां
नमो नमः श्रीगुरुपादुकाभ्याम् ॥

प्रभाप्रकाशार्थधृतव्रताभ्यां
तिरस्कृतानादिमनस्तमोभ्याम् ।
मुक्तिप्रदाभ्यां विभवप्रदाभ्यां
नमो नमः श्रीगुरुपादुकाभ्याम् ॥
दौर्भाग्यदावाग्निशिवाम्बुदाभ्यां
दूरीकृताशेषविपत्ततिभ्याम् ।
कृपाकृतार्थीकृतमादृशाभ्यां
नमो नमः श्रीगुरुपादुकाभ्याम् ॥

इमानि पद्यपुष्पाणि सदाह्लादकराणयतः।
लभन्तां स्वीयसाफल्यं गुरुपूजामहोत्सवे ॥
गुरुस्तुतिफलं वक्तुं शक्तः शेषोऽपि नो परम्।
स्वदन्ते स्तुतिकर्तारः फलं सद्यः परामृतम् ॥

रामेश्वरेण विदुषा
भक्तिप्रेरितचेतसा ।
श्रीगुरोर्लक्ष्मणास्यैषा
रचिता पादुकास्तुतिः ॥

इति मिथिलादेशस्थ-
श्रीरामेश्वराचार्यवर्य्यस्य
कृतिरियम् ॥

ॐ

कौलेत्युपाह्वश्रीजियालालरचिता

श्रीपादुकास्तुतिः

गौरीपतिं जगन्नाथं सर्वसंकटनाशिनम् ।
स्वभक्त्यामृतदातारं मुनीनां हितकारिणम् ॥ 1

समाधिप्रसरसास्वादपरमाह्लादचेतसाम् ।
योगिनां हृदये नित्यं भासमानं चिदात्मकम् ॥ 2

गुरूणामपि सर्वेषां गुरुं चैकं जगद्गुरुम् ।
नमाम्यहं महादेवं विश्वकल्याणकारिणम् ॥ 3

जयन्ति गुरुदेवानां पादपंकजपांसवः ।
यत्संस्पर्शात्तरन्त्येते जनाः संसारसागरम् ॥ 4

यज्जन्मपूतां जगतीं विलोक्य
स्वसृष्टिसाफल्यमबोधि धाता ।
नमाम्यहं तं गुरुमीश्वराख्यं
शिष्यान्समस्तान्भुवयन्तमेकम् ॥ 5

आशैशवाद्यो लभते समाधिं
योगीन्द्रनाथः स महाप्रभावः ।
एतद्धि श्रुत्वा चकिता जनाः स्यु-
र्हृष्टाः पुनस्ते विदितप्रभावाः ॥

समाधिलग्नं विषयैर्विमुक्तं
मनोऽस्य भोगेषु नियोजयन्तौ ।
कृतप्रयत्नावनवाप्तकामौ
शिष्यत्वमेवाधिगतौ गुरू स्वौ ॥
यथा पुरास्तात्पितरौ न शेकतुः
सुतस्य बुद्धस्य मनो विचालितुम् ।
महात्मनो धैर्यधनस्य योगिनो
विरागिणस्तत्त्वगवेषणोद्यतम् ॥
(युगलकम्)
यस्य प्रसादान्न भयं न दुःखं
सद्यो भवत्येव सुखञ्च शांतिः ।

नश्यन्ति विघ्नाः परमार्थमार्गे
तं रक्षितारं गुरुमानतोऽस्मि ॥
गुरुप्रसादाच्च सुखी सदाहं
गुरुप्रसादाच्च सदा शिवोऽहम् ।
तस्मात्सदा तस्य दयाभिकाङ्क्षी
तत्पादपद्मं हि सदाश्रयेऽहम् ॥
नमाम्यहं श्रीगुरुपादुकाद्वयं
वदाम्यहं श्रीगुरुदेवनाम ।
करोम्यहं श्रीगुरुपादपूजनं
भजाम्यहं तं सततं शरण्यम् ॥

या कापि नारी गुरुभक्तियुक्ता
पठिष्यति स्तोत्रमिदञ्च पुण्यम् ।
सौभाग्यवत्येव सदा लसन्ती
भवेत्सतीनामपि सा हि मुख्या ॥
भवन्तु सर्वे गुरुदेवनिष्ठा
धर्मप्रियाः पापपराङ्मुखाश्च ।
दया सदास्मासु चकास्ति यस्य
नमाम्यहं तं गुरुवर्यमीशम् ॥

ॐ

अथ

श्रीमन्महामाहेश्वराचार्यवर्य-
श्रीमदभिनवगुप्तपादविरचितं
देहस्थदेवताचक्रस्तोत्रम् ।

असुरसुरवृन्दवन्दित-
मभिमतवरवितरणे निरतम् ।
दर्शनशताग्र्यपूज्यं
प्राणतनुं गणपतिं वन्दे ॥ १

वरवीरयोगिनीगण-
सिद्धावलिपूजितांघ्रियुगलम् ।
अपहृतविनयिजनार्तिं
वटुकमपानाभिधं वन्दे ॥ 2

आत्मीयविषयभोगै-
रिन्द्रियदेव्यः सदा हृदम्भोजे ।
अभिपूजयन्ति यं तं
चिन्मयमानन्दभैरवं वन्दे ॥ 3

यद्धीबलेन विश्वं
भक्तानां शिवपथं भाति ।
तमहमवधानरूपं
सद्गुरुममलं सदा वन्दे ॥ 4

उदयावभासचर्वण-
लीलां विश्वस्य या करोत्यनिशम् ।
आनन्दभैरवीं तां
विमर्शरूपामहं वन्दे ॥ 5

अर्चयति भैरवं या
निश्चयकुसुमैः सुरेशपत्रस्था ।
प्रणमामि बुद्धिरूपां
ब्रह्माणीं तामहं सततम् ॥ 6
कुरुते भैरवपूजा-
मनलदलस्थाभिमानकुसुमैर्या ।
नित्यमहंकृतिरूपां
वन्दे तां शाम्भवीमम्बाम् ॥ 7

विदधाति भैरवार्चां
दक्षिणादलगा विकल्पकुसुमैर्या ।
नित्यं मनःस्वरूपां
कौमारीं तामहं वन्दे ॥ ४
नैऋतदलगा भैरव-
मर्चयते शब्दकुसुमैर्या ।
प्रणमामि श्रुतिरूपां
नित्यं तां वैष्णवीं शक्तिम् ॥ ५

पश्चिमदिग्दलसंस्था
हृदयहरैः स्पर्शकुसुमैर्या ।
तोषयति भैरवं तां
त्वग्रूपधरां नमामि वाराहीम् ॥ 10

वरतररूपविशेषै-
र्मारुतदिग्दलनिषण्णदेहा या ।
पूजयति भैरवं तामिन्द्राणीं
दृक्तनुं वन्दे ॥ 11

घनपतिकिसलयनिलया
या नित्यं विविधषड्रसाहारैः ।
पूजयति भैरवं तां
जिह्वाभिख्यां नमामि चामुण्डाम् ॥ 12

ईशदलस्था भैरव-
मर्चयते परिमलैर्विचित्रैर्या ।
प्रणमामि सर्वदा तां
घ्राणाभिख्यां महालक्ष्मीम् ॥ 13

षड्दर्शनेषु पूज्यं
षट्त्रिंशत्तत्त्वसंवलितम् ।
आत्माभिख्यं सततं
क्षेत्रपतिं सिद्धिदं वन्दे ॥ 14

संस्फुरदनुभवसारं
सर्वान्तः सततसन्निहितम् ।
नौमि सदोदितमित्थं
निजदेहगदेवताचक्रम् ॥ 15

इति श्रीमदाचार्याभिनवगुप्त-
पादविरचितं देहस्थदेवता-
चक्रस्तोत्रम् ।
इति शिवम् ।

ॐ

अथ

श्रीश्रीज्ञाननेत्रपादरचितं
कालिकास्तोत्रम् ।

सिततरसंविद्वाप्यं
सदसत्कलनाविहीनमनुपाधि ।
जयति जगत्त्रयरूपं
नीरूपं देवि ! ते रूपम् ॥ १

एकमनेकाकारं
प्रसृतजगद्व्याप्ति विकृतिपरिहीनम्

जयति तवाद्वयरूपं
विमलमलं चित्स्वरूपाख्यम् ॥2

जयति तवोच्छलदन्तः
स्वच्छेच्छायाः स्वविग्रहग्रहणम् ।

किमपि निरुत्तरसहज-
स्वरूपसंवित्प्रकाशमयम् ॥3

वान्त्वा समस्तकालं
भूत्वा झंकारघोरमूर्त्तिमपि ।

निग्रहमस्मिन्कृत्वा-
नुग्रहमपि कुर्वती जयति ॥4

कालस्य कालि! देहं
विभज्य मुनिपञ्चसंख्यया भिन्नम् ।
स्वस्मिन्विराजमानं
तद्रूपं कुर्वती जयसि ॥ 5

भैरवरूपी कालः
सृजति जगत् कारणादिकीटान्तम् ।
इच्छावशेन यस्याः
सा त्वं भुवनाम्बिका जयसि ॥ 6

जयति शशाङ्कदिवाकर-
पावकधामत्रयान्तरव्यापि ।

जननि! तव किमपि विमलं
स्वरूपरूपं परं धाम ॥ 7

एकं स्वरूपरूपं
प्रसरस्थितिविलयभेदतस्त्रिविधम् ।
प्रत्येकमुदयसंस्थिति-
लयविश्रमतश्चतुर्विधं तदपि ॥ 8

इति वसुपंचकसंख्यं
विधाय सहजस्वरूपमात्मीयम् ।
विश्वविवर्तावर्त-
प्रवर्तकं जयति ते रूपम् ॥ 9

(युगलकम्)

सदसद्विभेदसूते-
दलनपरा कापि सहजसंवित्तिः ।
उदिता त्वमेव भगवति !
जयसि जयाद्येन रूपेण ॥ 10
जयति समस्तचराचर-
विचित्रविश्वप्रपंचरचनोर्मि ।
अमलस्वभावजलधौ
शान्तं कान्तं च ते रूपम् ॥ 11
सहजोल्लासविकास-
प्रपूरिताशेषविश्वविभवैषा ।

पूर्णा तवाम्ब ! मूर्ति-
जयति परानन्दसंपूर्णा ॥ 12

कवलितसकलजगत्त्रय-
विकटमहाकालकवलनोद्युक्ता ।
उपभुक्तभावविभव-
प्रभवापि कृशोदरी जयसि ॥ 13

रूपत्रयपरिवर्जित-
समं रूपत्रयान्तरव्यापि ।
अनुभवरूपमरूपं
जयति परं किमपि ते रूपम् ॥

अव्ययमकुलममेयं
विगलितसदसद्विवेककल्लोलम् ।
जयति प्रकाशविभव-
स्फीतं काल्याः परं धाम ॥ 15
ऋतुमुनिसंख्यं रूपं
विभज्य पंचप्रकारमेकैकम् ।
दिव्यौघमुद्गिरन्ती
जयति जगत्तारिणी जननी ॥ 16
भूदिग्गोखगदेवी-
चक्रलसज्ज्ञानविभवपरिपूर्णाम् ।

निरुपमविश्रांतिमयं
श्रीपीठं जयति ते रूपम् ॥ 17

प्रलयलयान्तरभूमौ
विलसितसदसत्प्रपंचपरिहीनाम् ।
देवि! निरुत्तरतरां
नौमि सदा सर्वतः प्रकटाम् ॥ 18

याहङ् महाश्मशाने
हष्टं देव्याः स्वरूपमतुलस्थम्
ताहग् जगत्त्रयमिदं
भवतु तवाम्ब! प्रसादेन ॥ 19

इत्थं स्वरूपस्तुतिरभ्यधायि
सम्यक्समावेशदशावशेन ।
मया शिवेनास्तु शिवाय सम्यङ्
ममैव विश्वस्य तु मंगलाय ॥ 20

कृतिरियं श्रीश्रीज्ञाननेत्रपादाना-
मिति शिवम्

ॐ

नमः शिवाय

—·—

अस्मद्रूप समाविष्टः
स्वात्मनात्म निवारणे ।
शिवः करोतु निजया
नमः शक्त्याततात्मने ॥

ओमिति स्फुरदुरस्यनाहतं
गर्भगुम्फितसमस्तवाङ्मयम् ।
दन्ध्वनीति हृदि यत्परं पदं
तत्सदक्षरमुपास्महे महः ॥

भानुना तुहिनभानुना बृहद्-
भानुना च विनिवर्तितं न यत्।
येन तज्झगिति शान्तिमान्तरं
ध्वान्तमेति तदुपास्महे महः॥
तर्ककर्कशगिरामगोचरं
स्वानुभूतिसमयैकसाक्षिणम्।
मीलिताखिलविकल्पविप्लवं
पारमेश्वरमुपास्महे महः॥३॥
पद्मसद्मकरमर्दलालितं
पद्मनाभनयनाब्जपूजितम्।

पद्मबन्धुमुकुटांशुरञ्जितं
पादपद्मयुगमैश्वरं स्तुमः॥
यदि हरोऽसि तदा हर दुष्कृतं
यदि भवोऽसि तदा भव भूतये।
यदि शिवोऽसि तदा कुरु मे शुभं
शमय दुःखमिदं यदि शंकरः॥
शरणं तरुणेन्दुशेखरः
13 Sunday
शरणं मे गिरिराजकन्यका।
शरणं पुनरेव तावुभौ
शरणं नान्यदुपैमि दैवतम् ॥६॥

सदुपायकथास्वपण्डितो
हृदये दुःखशरेण खण्डितः ।
शशिखण्डशिखण्डमण्डनं
शरणं यामि शरण्यमीश्वरम् ॥७॥

रामनामजपतां कुतो भयं
सर्वतापशमनैकभेषजम् ।
पश्य तात मम गात्रसन्निधौ
पावकोऽपि सलिलायतेऽधुना ॥८॥

क्षालयामि तव पादपङ्कजं
नाथ दारुदृषदोः किमन्तरम् ।

मानुषी करणचूर्णमस्तिते
पादयोरिति कथा प्रथीयसी ॥
आञ्जनेयमतिपाटलाननं
काञ्चनाद्रिकमनीयविग्रहम् ।
पारिजाततरुमूलवासिनं
भावयामि पवमाननन्दनम् ॥
यत्र यत्र रघुनाथकीर्तनं
तत्र तत्र कृतमस्तकाञ्जलिम् ।
बाष्पवारिपरिपूर्णलोचनं
मारुतिं नमत राक्षसान्तकम् ॥

उल्लङ्घ्य सिन्धोः सलिलं सलीलं
यः शोकवह्निं जनकात्मजायाः ।
आदाय तेनैव ददाह लङ्कां,
नमामि तं प्राञ्जलिराञ्जनेयम् ॥

मनोजवं मारुत तुल्यवेगं
जितेन्द्रियं बुद्धिमतां वरिष्ठम् ।
वातात्मजं वानरयूथमुख्यं
श्रीरामदूतं शरणं प्रपद्ये ॥

स्वैरेव यद्यपि गतोऽहमधः कुकृत्यै-
स्तत्रापि नाथ तव नास्म्यवलेपपात्रम् ।

दृप्तः पशुः पतति यः स्वयमन्धकूपे
नोपेक्षते तमपि कारुणिको हि लोकः ॥
मानुष्यनावमधिगम्य चिरादवाप्य
निस्तारकश्च करुणाभरणं भवन्तम् ।
यस्याभवद्गुरवशास्तरितुं भवाब्धिं
सोऽहं ब्रुडामि यदि कस्य विडम्बनेयम् ॥

महेश्वरे वा जगतामधीश्वरे
जनार्दने वा जगदन्तरात्मनि ।
न कापि भेदप्रतिपत्तिरस्ति मे
तथापि भक्तिस्तरुणेन्दुशेखरे ॥

वामे भूमिसुता पुरश्च हनुमान्
पश्चात् सुमित्रासुतः
शत्रुघ्नो भरतश्च पार्श्वदलयो-
र्वाय्वादिकोणेषु च ।
सुग्रीवश्च विभीषणश्च युवराट्
तारासुतो जाम्बवान्
मध्ये नीलसरोजकोमलरुचिं
रामं भजे श्यामलम् ॥
श्रीरामः शरणं समस्त जगतां
रामं नमामीश्वरम् ।

रामेण रचितं त्रिलोकमखिलं

रामाय तुभ्यं नमः ॥

रामात् सर्वमिदम् जगत् समुदितं

रामस्य दासोऽस्म्यहम् ।

रामे मे रतिरस्तु राम नहि माम्

मोक्तुं भवानर्हति ॥

तव च काचन न स्तुतिरम्बिके

सकलशब्दमयी किल ते तनुः ।

निखिलमूर्तिषु मे भवदन्वयो

मनसिजासु बहिष्प्रसरासु च ॥

इति विचिन्त्य शिवे शमिताशिवे
जगति जातभयत्नवशादिदम् ।
स्तुतिजपार्चनचिन्तनवर्जिता
न खलु काचन कालकलापि मे ॥

(युगलकम्)

अस्त्यस्मिन्महसां महानिधिरसौ
देवो विवस्वान् महान्
यस्मिञ्जाग्रति जाग्रतीव रजनी-
सुप्ता इमे जन्मिनाः ।
किन्त्वेका महती ततो विजयते
श्रीदेशिकाङ्घ्रिद्युति-
र्यद्योगात्स्फुरितं चिरन्तनतमो
हित्वैव जागर्ति सत् ॥

ॐ जुं सः अमृतेश्वरभैरवाय नमः ॥

~•~

(ॐ)

अन्तरालीनतत्त्वौघं चिदानन्दघनं महत् ।
यत्तत्त्वं शैवधामाख्यं तदोमित्यभिधीयते ॥

(जुं)

तादृगात्मपरामर्शशालिनी शक्तिरस्य या ।
देशकालापरिच्छिन्ना सा जुंशब्देनकथ्यते ॥

(सः)

सिसृक्षोल्लेखनिर्माणशक्तित्रितयनिर्भरा ।
जगतो येशिताशक्तिः सा स इत्युच्यते स्फुटम् ॥

(अमृतेश्वर)

स्वशक्त्यभिव्यक्तिमये मोक्षेऽस्यैश्वर्ययोगतः।
स्वोपासकानाममृतेश्वरत्वं तस्य सुस्फुटम्॥

(भैरवाय)

नीलहर्षादिभेदेन यद्बाह्याभ्यन्तरं जगत्।
अहमित्यामृशन्पूर्णो भैरवः समुदाहृतः॥

(नमः)

देहप्राणसुखादीनां न्यग्भावाद्रूकसंहतेः।
या चिदात्मनि विश्रान्तिर्नमःशब्देन
सोच्यते॥

...

त्रयी सप्तचतुर्युगममये त्रितयवर्त्मनि ।
स्थितो यः शक्तिसहितः स जयत्यमृतेश्वरः ॥
॥२॥

आत्मेन्दुधामनि युगेशनरेशपुत्र-
चित्रां त्रिशूलबिलधामनि सृष्टशक्तिम् ।
वैसर्गिके चितिपदेऽप्यथपुण्डरीकां
काश्चित्परां त्रिकपरां प्रणमामि देवीम् ॥
॥३॥

श्रीमत्सदाशिवपदेऽपि महोग्रकाली
भीमोत्कटभ्रुकुटिरेष्यति भङ्गभूमिः।
इत्याकलय्य परमां स्थितिमेत्य काल-
संकर्षिणीं भगवतीं हठतोऽधितिष्ठेत्॥

तन्मध्ये तु परा देवी दक्षिणे च परापरा।
अपरा वामशृङ्गे तु मध्यशृङ्गोर्ध्वतः शृणु॥
या सा संकर्षिणी काली परातीता व्यवस्थिता॥

कृत्वाधारधरां चमत्कृतिरसप्रोक्षाक्षणक्षालिता-

मात्तैर्मानसतः स्वभावकुसुमैः स्वामोदसंदोहिभिः।

आनन्दामृतनिर्भरस्वहृदयानर्घार्घपात्रक्रमात्

त्वां देव्या सह देहदेवसदने देवार्चये ऽहर्निशम् ॥

नानास्वादरसामिमां त्रिजगतीं हृच्चक्रयन्त्रार्पिता-

मूर्ध्वाधस्तविवेकगौरवभरान्निष्पीडयनिःष्यन्दितम्।

यत्संवित्परमामृतं मृतिजराजन्मापहं जृम्भते

तेन त्वां हविषा परेण परमे संतर्पये ऽहर्निशम् ॥

कालाग्निरुद्रात्प्रसूतं च तेजो
भूरि स्फुटं दीप्ततरं विचिन्त्यम् ।
ऊर्ध्वे स्थिता चन्द्रकला च शान्ता
पूर्णामृतानन्दरसेन देवि ॥
तदोभयोर्वह्निविषानुयोगा-
त्तेजःशशाङ्कौ द्रवितौ च यस्मात् ।
तेजश्शशाङ्कस्फुटमिश्रितत्वा-
22 Sunday द्वेन्द्रदार्कं स्रवतारूपम् ॥

परस्परसमातिष्टौ चन्द्रेऽग्निश्चेतिमे शशी ।
चन्द्रं सृष्टिं विजानीयादग्निः संहार उच्यते ॥
अवतारो रविः प्रोक्तो मध्यस्थः परमेश्वरः ।

ततः सकाशात्समताप्ययौ स्तो
यस्मादयं विश्वसमग्रभेदः ।
एतच्च विद्वान्विदितार्थभावो
ध्यायेत युक्त्यात्मचिदर्करूपम् ॥

द्वारेशा नवरन्ध्रगा हृदयगो वास्तुर्गणेशो महान्
शब्दाद्या गुरवः समीरदशकं त्वाधारशक्त्यात्मकम् ।

चिद्देवोऽथ विमर्शशक्तिसहितः षाड्गुण्यमङ्गावलि-
लोकेशाः करणानि यस्य महिमा तं नेत्रनाथं स्तुमः ॥

विगलति भवदौर्गत्यं मोक्षश्री श्रयति हृत्कजं कचति ।
प्रसरति परमानन्दो यत्र तदीशार्चनं जयति ॥ २॥

अस्तङ्गतवति प्राणे त्वपानेऽभ्युदयोन्मुखे ।
तावत्सा कुम्भकावस्था योगिभिरनुभूयते ॥

यथा निमीलने काले प्रपञ्चो नैव दृश्यते ।
तथैवोन्मीलने स्याचेदेतद्ध्यानस्य लक्षणम् ॥

प्रकाशमाने परमार्थभानौ
नश्यत्यविद्यातिमिरे समस्ते ।
तदा बुधा निर्मलदृष्टयोऽपि
किञ्चिन्न पश्यन्ति मतप्रपञ्चम् ॥

प्रनष्टवायुसंचारः पाषाण इव निश्चलः ।
परजीवैक्यधर्मज्ञो योगी योगविदुच्यते ॥

ब्रह्मविष्णुमहेशादिदेवता भूतजातयः ।
नाशमेवानुधावन्ति तस्माच्छ्रेयः समभ्यस्येत् ॥

अज्ञो जन्तुरनीशोऽयमात्मनः सुखदुःखयोः।
ईश्वरप्रेरितो गच्छेच्छ्वभ्रं वा स्वर्गमेव वा ॥

यावन्नैव प्रविशति चरन्मारुतो मध्यमार्गे
यावद्बिन्दुर्न भवति दृढं प्राणवातप्रबन्धात्।
यावन्नैव सहजसदृशं जायते चैव तत्त्वम्
तावत्सर्वं तदिदमखिलं दम्भमिथ्याप्रलापम् ॥

आस्थानं चिद्रसस्यौघं साकारत्वमुपागतम्।
जगद्रूपतया वन्दे प्रत्यक्षं भैरवं वपुः ॥

उज्झित्वात्मसमाधानं ये ध्यायन्त्यन्यदेवताः।
भिक्षन्ते भूरिवित्तास्ते भिक्षित्वापि बुभुक्षिताः॥

अवस्थाभेदप्रक्रिया

जाग्रत्स्वप्नसुषुप्तान्यतदतीतानि यान्यपि।
तान्यप्यमुष्यनाथस्य स्वातन्त्र्यलहरीभरः॥

प्रमातृभेदप्रक्रिया

महामन्त्रेशमन्त्रेशमन्त्राः शिवपुरोगमाः।
अकलौ सकलश्चेति शिवस्यैव विभूतयः॥

अध्वभेदप्रक्रिया

बहुशक्तित्वमस्योक्तं शिवस्य यदतो महान् ।
कलातत्त्वपुराणाणुः पदादिभेदविस्तरः ॥

कदाचिद्भक्तियोगेन कर्मणा विद्ययापि वा ॥
ज्ञानधर्मोपदेशेन मन्त्रैर्वा दीक्षयापि वा ।
एवमाद्यैरनेकैश्च प्रकारैः परमेश्वरः ॥
संसारिणोऽनुगृह्णाति विश्वस्य जगतः पतिः ।

कृत्यभेदप्रक्रिया

सृष्टिस्थितितिरोधानसंहारानुग्रहादि च ।
तुर्यमित्यपि देवस्य बहुशक्तित्वजृम्भितम् ॥

तस्य शक्तय एवैतास्तिस्रो भान्ति परादिकाः।
सृष्टौ स्थितौ लये तुर्ये तेनैता द्वादशोदिताः॥
क्रमाभावान्न युगपत्तदभावात्क्रमोऽपि न॥
क्रमाक्रमकथातीतं संवित्तत्त्वं सुनिर्मलम्॥
अदीक्षितानां पुरतो नोच्चरेच्छिवसंहिताम्।
तमाराध्य ततस्तुष्टाद्दीक्षामासाद्य शांकरीम्।
येन केनाप्युपायेन गुरुमाराध्य भक्तितः।
तद्दीक्षाक्रमयोगेन शास्त्रार्थं वेत्त्यसौ ततः।
अभिषेकं समासाद्य यो भवेत्स तु कल्पितः॥
सन्नप्यशेषपाशौघनिवर्तनकोविदः।

संसारमोहनाशाय शब्दबोधो न हि क्षमः।
न निवर्तेत तिमिरं कदाचिद्दीपवार्तया॥
अभ्यस्य वेदशास्त्राणि सारं ज्ञात्वाथ बुद्धिमान्।
पलालमिव धान्यार्थी त्यजेच्छास्त्रमशेषतः॥
षड्दर्शनमहाकूपे पतिताः पशवः प्रिये।
न जानन्ति परं तत्त्वं दर्वी पाकरसं यथा॥
यदा तु वैचित्र्यवशाज्जानीयात्तस्य तादृशम्।
विपरीतप्रवृत्तत्वं ज्ञानं तस्मादुपाहरेत्॥
तं च त्यजेत्पापवृत्तिं भवेज्ज्ञानतत्परः।

यदा किंचिद्ज्ञोऽहं द्विप इव मदान्धः समभवं
तदा सर्वज्ञोऽस्मीत्यभवदवलिप्तं मम मनः ।
यदा किंचित्किंचिद्बुधजनसकाशादवगतं
तदा मूर्खोऽस्मीति ज्वर इव मदो मे व्यपगतः ॥

शासनरोधनपालनपाचनयोगात्स सर्वमुपकुरुते ।
तेन पतिः श्रेयोमय एव शिवो नाशिवं किमपि तत्र
ईदृग्रूपं कियदपि रुद्रोपेन्द्रादिषु स्फुरेद्येन ।
तेनावच्छेदनुदे परममहत्पदविशेषणमुपात्तम् ॥
देवो ह्यन्वर्थशास्त्रोक्तैः शब्दैः समुपदिश्यते ।
महाभैरवदेवोऽयं पतिर्यः परमः शिवः ॥

विश्वं बिभर्ति पूरणधारणयोगेन तेन च भ्रियते।
सविमर्शतया एव रूपतश्च संसारभीरुहितकृच्च ॥
भैरव इति गुरुभिरिमैरन्वर्थैः संस्तुतः शास्त्रे ॥
संसारभीतिजनिताद्रवात्परामर्शतोऽपि हृदि जातः।
प्रकटीभूतं भवभयविमर्शनं शक्तिपाततो येन ॥
भैरव इति गुरुभिरिमैरन्वर्थैः संस्तुतः शास्त्रे ॥
नक्षत्रप्रेरककालतत्त्वसंशोषकारिणो ये च ।
कालग्राससमाधानरसिकमनःसु तेषु च प्रकटः ॥
भैरव इति गुरुभिरिमैरन्वर्थैः संस्तुतः शास्त्रे ॥

संकोचिपशुजनमिये यासां स्वणं स्वकरणदेवीनाम्।
अन्तर्बहिश्चतुर्विधरवेचर्योदिकगणस्यापि ॥
तस्य स्वामी संसारवृत्तिविघट्टनमहाभीमः ।
भैरव इति गुरुभिरिभैरन्वर्थैः संस्तुतः शास्त्रे ॥

विश्वैकरूपविश्वात्म विश्वसर्गादिकारणं ।
परप्रकाशवपुषं स्तुमः स्वच्छन्दभैरवम् ॥

मध्यप्राणनिविष्टहंसपरमः यो रोमकूपाश्रयः ।
प्राणः सूक्ष्मविमर्शशालिवपुषः सार्धत्रिकोट्यात्मकः ॥
तान्मन्त्रात्मतया विलोमयति यः स्वच्छन्दनाथः परो।
देवोऽसौ विदधातु भैरववपुस्तेजः परं शाश्वतम् ॥

दुष्करं सुकरीकर्तुं दुःखं सुखयितुं तथा ।
एकवीरा स्मृतिर्यस्य तं स्मरामः स्मरद्विषम् ॥
क्षमः कां नापदं हन्तुं कां दातुं संपदं न वा ।
योऽसौ स दयितोऽस्माकं देवदेवो वृषध्वजः ॥

दृष्ट्वा शिष्यं जराग्रस्तं व्याधिभिः परिपीडितम् ।
उत्क्रमय्य ततस्त्वेनं परतत्त्वे नियोजयेत् ॥
सर्तमप्यथवा भोगं मन्यमानो विरूपकम् ॥
उत्क्रमय्य ततस्त्वेनं परतत्त्वे नियोजयेत् ॥
तामाश्रित्योर्ध्वमार्गेण चन्द्रसूर्यावुभावपि ।
सौषुम्णेऽध्वन्यस्तमितः हित्वा ब्रह्माण्डगोचरम् ॥

तदा तस्मिन्महाव्योम्नि प्रलीनशशिभास्करे ।
सौषुप्तपदवन्मूढः प्रबुद्धः स्यादनावृतः ॥

यामवस्थां समालम्ब्य यदयं मम वक्ष्यति ।
तदवश्यं करिष्येऽहमिति संकल्प्य तिष्ठति ॥

यत्रोपरमते चित्तं निरुद्धं योगसेवनात् ।
यत्र चैवात्मनात्मानं पश्यन्नात्मनि तुष्यति ।
सुखमात्यन्तिकं यत्तद्बुद्धिग्राह्यमतीन्द्रियम् ।
वेत्ति यत्र न चैवायं स्थितश्चलति तत्त्वतः ॥
यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः ।
यस्मिन् स्थितो न दुःखेन गुरुणापि विचाल्यते

तं विद्याद्दुःखसंयोगवियोगं योगसंज्ञितम् ।
स निश्चयेन योक्तव्यो योगोऽनिर्विण्णचेतसा
प्रशान्तमनसं ह्येनं योगिनं सुखमुत्तमम् ।
उपैति शान्तरजसं ब्रह्मभूतमकल्मषम् ॥
युञ्जन्नेवं सदात्मानं योगी नियतमानसः ।
सुखेन ब्रह्मसंयोगमत्यन्तमधिगच्छति ॥
विद्यायुतसहस्रं तु परोत्साहसमन्वितम् ।
प्रहरत्यनिशं जन्तोः सद्गुरुस्त्वभिमुखस्य च ॥
विशेषतो भवाम्भोधिसमुत्तरणकारिणः ॥

पूर्णानन्दस्वभावः

स्वजनहितकृते माययोपात्तकायः ।

कारुण्यादुद्दिधीर्षुजनमनवरतं

मोहपङ्के निमग्नम् ॥

आविश्यान्तर्वसिष्ठं

बहिरपि कलयन् शिष्यभावं वितेने ।

यः संवादेन शास्त्रामृतजलधि-

ममुं रामचन्द्रं प्रपद्ये ॥

रामः किमुच्यते देव ! योऽत्रस्थः स च कः प्रभो !

तस्याभ्यासः कथं नाम ब्रूहि मे परमेश्वर !

(इतिप्रश्नग्रन्थः)

(अत्रोत्तरग्रन्थः)

गतिः स्थानं स्वप्नजाग्रदुन्मेषणनिमेषणे ।

धावनं प्लवनं चैव आयासः शक्तिवेदनम् ॥

बुद्धिभेदास्तथाभावाः संज्ञाकर्माण्यनेकशः ।

एतच्चतुर्दशविधं रामं तु परिकीर्तितम् ।

ऊर्ध्वं त्यक्त्वाधो विशेत्स रामस्थो मध्यदेशगाः

न मोक्षो नभसः पृष्ठे न पाताले न भूतले।
सर्वाशासंक्षये चेतः क्षयो मोक्ष इतीर्यते ॥

(इति वेदान्ते)

मोक्षस्य नैव किञ्चिद्
धामास्ति न चापि गमनमन्यत्र।
अज्ञानग्रन्थिभिदा
स्वशक्त्यभिव्यक्तिता मोक्षः ॥

(इति त्रिकागमे)

मोक्षो हि नाम नैवान्यः स्वरूपप्रथनं हि सः ।
स्वरूपं चात्मनः संविन्नान्यत्तत्र तु याः पुनः ॥
क्रियादिकाः शक्तयस्ताः संविद्रूपाधिकाः नहि ।
असंविद्रूपतायोगाद्धर्मिणश्चानिरूपणात् ॥
(युगलकम्)

परमेश्वरशास्त्रे हि न च काणाददृष्टिवत् ।
शक्तीनां धर्मरूपाणामाश्रयः कोऽपि कथ्यते ॥

एक एव मनोदेवो जितः सर्वार्थसिद्धिदः ।
अन्यश्च विफलः क्लेशः सर्वेषां तज्जयं विना ॥

सोऽपि स्वातन्त्र्यधाम्ना चेदप्यनिर्मलसंविदाम् ।
अनुग्रहं चिकीर्षुस्तद्भाविनं विधिमाश्रयेत् ॥
तदर्थमेव चास्यापि परमेश्वररूपिणः ।
तदभ्युपायशास्त्रादिश्रवणाध्ययनादरः ॥
नहि तस्य स्वतन्त्रस्य कापि कुत्रापि खण्डना ।
नानिर्मलचित्तः पुंसोऽनुग्रहस्त्वनुपायकः ॥

अयं रसो येन मनागवाप्तः
स्वच्छन्दचेष्टानिरतस्य तस्य ।
समाधियोगव्रतमन्त्रमुद्रा-
जपादिचर्या विषवद्विभाति ॥

तत्त्वमात्मस्थमज्ञात्वा मूढः शास्त्रेषु मुह्यते ।
गोपः कुक्षिगतं छागं कूपे पश्यति दुर्मतिः ॥
बहिर्मुखस्य मन्त्रस्य वृत्तयो या प्रकीर्तिताः ।
ता एवान्तर्मुखस्यास्य शक्तयः परिकीर्तिताः ॥

हस्तं हस्तेन संपीड्य-
दन्तैर्दन्तांश्च पीडयन् ।
अङ्गान्यङ्गैः समाक्रम्य
जयेदादौ स्वकं मनः ॥

तं ये पश्यन्ति ताद्रूप्यक्रमेणामलसंविदः ।
तेऽपि तद्रूपिणस्तावत्येवास्यानुग्रहात्मता ॥

अनुपाय (१) आणवोपाय (२)

गुरोर्वाक्याद्युक्तिप्रचयरचनोन्मार्जनवशात्

शक्तोपाय (३) शाम्भवोपाय (४)

समाश्वासाच्छास्त्रं प्रति समुदितादापि कथितात् ।
विलीने शंकाभ्रे हृदयगगनोद्भासिमहसः
प्रभोः सूर्यस्येव स्पृशत चरणान्ध्वान्तजयिनः ॥

अर्थेषु तद्योगविधौ तदुत्थे
दुःखे सुखे वा गलिताभिशङ्कम् ।
अनाविशन्तोऽपि निमग्नचित्ता
जानन्ति वृत्तिक्षयसौख्यमन्तः ॥

- १८५ -

अनुत्तरेऽभ्युपायोऽत्र ताद्रूप्यादेव वर्णितः ।
ज्वलितेष्वपि दीपेषु घर्मांशुः किं न भासते ॥
ततोऽपि परमं ज्ञानमुपायादिविवर्जितम् ।
आनन्दशक्तिविश्रान्तमनुत्तरमिहोच्यते ॥

प्रज्ञाप्रासादमारुह्य
अशोच्यः शोचतो जनान् ।
भूमिष्ठानिव शैलस्थः
सर्वान् प्राज्ञोऽनुपश्यति ।

26 Sunday

अविकल्पपथारूढो येन येन पथा विशेत् ।
धरासदाशिवान्तेन तेन तेन शिवीभवेत् ॥

यथा स्थितस्तथैवास्व मा गा बाह्यमथान्तरम् ।
केवलं चिद्विकासेन विकारनिकराञ्जहि ॥

संसारजीर्णतरुमूलकलापकल्प-
संकल्पमान्तरतया परमार्थवह्नेः ।
स्युर्विस्फुलिङ्गकणिका अपि चेत्तदन्ते
देदीप्यते विमलबोधहुताशराशिः ॥

शास्त्रविरुद्धाचरणात् कृष्णं ये कर्म विदधते।
तत्र भीमैर्लोकपुरुषैः पीड्यन्ते भोगपर्यन्तम्

ये सकृदपि परमेशं
शिवमेकाग्रेण चेतसा शरणम् ।
यान्ति न ते नरकजुषः
कृष्णं तेषां सुखाल्पतादायि ॥

अस्वतन्त्रस्य कर्तृत्वं नहि जातूपपद्यते ।
वस्तुतः सर्वभावानां कर्तेशानः परः शिवः ॥
तथा च तेषां हेतूनां संयोजनवियोजने ।
नियते शिव एवैकः स्वतन्त्रः कर्तृतामियात् ॥
बहवो गुरवः सन्ति शिष्यवित्तापहारकाः ।
दुर्लभोऽयं गुरुर्देवि शिष्यसन्तापहारकः ॥

अभिनवोत्पलसौरभसंस्कृतं
रसयतः शिवदृष्टिरसायनम् ।
इह सदैव सदैव निरामयं
हृदयमस्तु मम प्रतिभामयम् ॥

यो विचित्ररससेकवर्धितः
शङ्करेति शतशोऽप्युदीरितः ।
शब्द आविशति तिर्यगाशये-
ष्वप्ययं नवनवप्रयोजनः ॥
ते जयन्ति मुखमण्डले भ्रमन्
अस्ति येषु नियतं शिवध्वनिः ।
यः शशीव प्रसृतोऽमृताशयात्
स्वादु संस्रवति चामृतं परम् ॥

अथ

संग्रहस्तोत्रनाम

संग्रहेण सुखदुःखलक्षणं
मां प्रति स्थितमिदं शृणु प्रभो।
सौख्यमेष भवता समागमः
स्वामिना विरह एव दुःखिता ॥

अन्तरप्यतितरामणीयसी
या त्वदप्रथनकालिकास्ति मे।
तामपीश परिमृज्य सर्वतः
स्वं स्वरूपममलं प्रकाशय ॥

तावके वपुषि विश्वनिर्भरे
चित्सुधारसमये निरत्यये ।
तिष्ठतः सततमर्चतः प्रभुं
जीवितं मृतमथान्यदस्तु मे ॥
ईश्वरोऽहमहमेव रूपवान्
पण्डितोऽस्मि सुभगोऽस्मि कोऽपरः ।
मत्समोऽस्ति जगतीति शोभते
मानिता त्वदनुरागिणः परम् ॥

देवदेव भवदद्भुतामृता-
ख्यातिसंहरणलब्धजन्मना ।
तद्यथास्थितपदार्थसंविदा
मां कुरुष्व चरणार्चनोचितम् ॥

ध्यायसे तदनु दृश्यसे ततः
स्पृश्यसे च परमेश्वर स्वयम् ।
यत्र पूजनमहोत्सवः स मे
सर्वदास्तु भवतोऽनुभावतः ॥

यद्यथास्थितपदार्थदर्शनं
युष्मदर्चनमहोत्सवश्च यः ।
युग्ममेतदितरेतराश्रयं
भक्तिशालिषु सदा विजृम्भते ॥
तत्तदिन्द्रियमुखेन सन्ततं
युष्मदर्चनरसायनासवम् ।
सर्वभावचषकेषु पूरिते-
ष्वापिबन्नपि भवेयमुन्मदः ॥

अन्यवेद्यमणुमात्रमस्ति न
स्वप्रकाशमखिलं विजृम्भते ।
यत्र नाथ, भवतः पुरे स्थितिं
तत्र मे कुरु सदा तवार्चितुः ॥
दासधाम्नि विनियोजितोऽप्यहं
स्वेच्छयैव परमेश्वर त्वया ।
दर्शनेन न किमस्मि पात्रितः
10 Sunday
पादसंवहनकर्मणापि वा ॥

शक्तिपातसमये विचारणं
प्राप्तमीश न करोषि कर्हिचित् ।
अद्य मां प्रति किमागतं यतः
स्वप्रकाशनविधौ विलम्बसे ॥
तत्र तत्र विषये बहिर्विभा-
त्यन्तरे च परमेश्वरीयुतम् ।
त्वां जगत्त्रितयनिर्भरं सदा
लोकयेय निजपाणिपूजितम् ॥

स्वामिसौधमभिसन्धिमात्रतो
निर्विबन्धमधिरुह्य सर्वदा ।
स्यां प्रसादपरमामृतासवा-
पानकेलिपरिलब्धनिर्वृतिः ॥
यत्समस्तसुभगार्थवस्तुषु
स्पर्शमात्रविधिना चमत्कृतिम् ।
तां समर्पयति तेन ते वपुः
पूजयन्त्यचलभक्तिशालिनः ॥

स्फारयस्यखिलमात्मना स्फुरन्
विश्वमामृशसि रूपमामृशन् ।
यत्स्वयं निजरसेन घूर्णसे
तत्समुल्लसति भावमण्डलम् ॥
योऽविकल्पमिदमर्थमण्डलं
पश्यतीश निखिलं भवद्वपुः ।
स्वात्मपक्षपरिपूरिते जग-
त्यस्य नित्यसुखिनः कुतो भयम् ॥

कण्ठकोणविनिविष्टमीश ते
कालकूटमपि मे महामृतम् ।
अप्युपात्तममृतं भवद्वपु
र्भेदवृत्ति यदि रोचते न मे ॥१७॥

त्वत्प्रलापमयरक्तगीतिका-
नित्ययुक्तवदनोपशोभितः ।
स्यामथापि भवदर्चनक्रिया-
प्रेयसीपरिगताशयः सदा ॥१८॥

ईहितं न बत पारमेश्वरं
शक्यते गणयितुं तथा च मे ।
दत्तमप्यमृतनिर्भरं वपुः
स्वं न पातुमनुमन्यते तथा ॥१९॥

तामगाधमविकल्पमद्वयं
स्वं स्वरूपमखिलार्थघस्मरम् ।
आविशन्नहमुमेश सर्वदा
पूजयेयमभिसंस्तुवीय च ॥२०॥

आमनोऽक्षवलयस्य वृत्तयः
सर्वतः शिथिलवृत्तयोऽपि ताः ।
त्वामवाप्य दृढदीर्घसंविदो
नाथ भक्तिघनसोष्मणां कथम् ॥

~०~

अथ
जयस्तोत्रनाम स्तोत्रम्

~०~

ॐ जयलक्ष्मीनिधानस्य निजस्य स्वामिनः पुरः
जयोद्घोषणपीयूषरसमास्वादये क्षणम् ॥
जयैकरुद्रैकशिव महादेव महेश्वर ।
पार्वतीप्रणयिञ्शर्व सर्वगीर्वाणपूर्वज ॥
जय त्रैलोक्यनाथैकलाञ्छनालिकलोचन ।
जय पीतार्तलोकार्तिकालकूटाङ्ककन्धर ॥

जय मूर्तित्रिशक्त्यात्मशितशूलोल्लसत्कर ।
जयेच्छामात्रसिद्धार्थपूजार्हचरणाम्बुज ॥
जय शोभाशतस्यन्दिलोकोत्तरवपुर्धर ।
जयैकजटिकाक्षीणगङ्गाकृत्यात्तभस्मक ॥
जय क्षीरोदपर्यस्तज्योत्स्नाच्छायानुलेपन ।
जयेश्वराङ्गसङ्गोत्थरत्नकान्ताहिमण्डन ॥
जयाक्षयैकशीतांशुकलासदृशसंश्रय ।
जय गङ्गासदारब्धविश्वैश्वर्याभिषेचन ॥

जयाधराङ्गसंस्पर्शपातनीकृतगोकुल ।
जय भक्तिमदाबद्धगोष्ठीनियतसन्निधे ॥
जय स्वेच्छातपोवेशविप्रलम्भितबालिश ।
जय गौरीपरिष्वङ्गयोग्यसौभाग्यभाजन ॥
जय भक्तिरसार्द्रार्द्रभावोपायनलम्पट ।
जय भक्तिमदोद्दामभक्तवाङ्नृत्ततोषित ॥
जय ब्रह्मादिदेवेशप्रभावप्रभवव्यय ।
जयलोकेश्वरश्रेणीशिरोविधृतशासन ॥

जय सर्वजगन्न्यस्तस्वमुद्राव्यक्तवैभव ।
जयात्मदानपर्यन्तविश्वेश्वर महेश्वर ॥
जय त्रैलोक्यसर्गेच्छावसरासद्द्वितीयक ।
जयैश्वर्यभरोद्वाहदेवीमात्रसहायक ॥
जयाक्रमसमाक्रान्तसमस्तभुवनत्रय ।
जयाविगीतमाबालगीयमानेश्वरध्वने ॥
जयानुकम्पादिगुणानपेक्षसहजोन्नते ।
जय भीष्ममहामृत्युघटनापूर्वभैरव ॥

जय विश्वक्षयोच्चण्डक्रियानिष्परिपन्थिक ।

जय श्रेयःशतगुणानुगनामानुकीर्तन ॥

जय हेलावितीर्णैतदमृताकरसागर ।

जय विश्वक्षयाक्षेपिक्षणकोपाशुशुक्षणे ॥

जय मोहान्धकारान्धजीवलोकैकदीपक ।

जय प्रसुप्तजगतीजागरूकाधिपूरुष ॥

जय देहाद्रिकुञ्जान्तर्निकूजञ्जीवजीवक ।

जय सन्मानसव्योमविलासिवरसारस ॥

जय जाम्बूनदोदग्रधातूद्भवगिरीश्वर ।
जय पापिषु निन्दोल्कापातनोत्पातचन्द्रमः ॥
जय कष्टतपःक्लिष्टमुनिदेवदुरासद ।
जय सर्वदशारूढभक्तिमल्लोकलोकित ॥
जय स्वसम्पत्प्रसरपात्रीकृतनिजाश्रित ।
जय प्रपन्नजनतालालनैकप्रयोजन ॥
जय सर्गस्थितिध्वंसकारणैकावदानक ।
जय भक्तिमदालोललीलोत्पलमहोत्सव ॥

जय जयभाजन जय जितजन्म-

जरामरण जय जगज्ज्येष्ठ ।

जय जय जय जय जय जय जय

जय जय जय जय जय जय त्र्यक्ष ॥

आनन्दसुन्दरपुरन्धरमुक्तमाल्यं
मौलौ हठेन निहितं महिषासुरस्य ।
पादाम्बुजं भवतु मे विजयाय मञ्जु-
मञ्जीरशिञ्जितमनोहरमम्बिकायाः ॥

ये देवि दुर्धरकृतान्तमुखान्तरस्थाः
ये कालि कालघनपाशनितान्तबद्धाः ।
ये चण्डि चण्डगुरुकल्मषसिन्धुमग्ना-
स्तान्पासि मोचयसि तारयसि स्मृतैव ॥

ब्रह्माण्डबुद्बुदकदम्बकसङ्कुलोऽयं
मायोदधिर्विविधदुःखतरङ्गमालः ।
आश्चर्यमम्ब झटिति प्रलयं प्रयाति
त्वद्ध्यानसंततिमहावडवामुखाग्नौ ॥

परं परस्थं गहनादनादि-
मेकं निविष्टं बहुधा गुहासु ।
सर्वालयं सर्वचराचरस्थं
त्वामेव शम्भुं शरणं प्रपद्ये ॥

ते पङ्कमङ्कगतमात्मनि धावयन्ति
दिङ्मण्डलं च परितः परिपावयन्ति ।
क्लेशान्क्षणात्तृणगणानिव लावयन्ति
ये त्वां प्रकाशवपुषं हृदि भावयन्ति ॥

भ्रान्तोऽस्मि वैशसमये समयेऽहमत्र
मिथ्यैव दिग्भ्रमहतो महतोऽपि मार्गान् ।
विश्रम्य नन्दनवने नवने शिवस्य
खेदस्तु संप्रति समेति स मेऽवसानम् ॥

सहस्रशीर्षा पुरुषः पुनातु वः

सहस्रचक्षुर्भगवान् सहस्रपात् ।

गलेऽङ्घ्रिमूले नयने च निश्चला-

स्त्रयोऽप्यमी यं पुरुषा उपास्ते ॥

ॐ

शं नो मित्रः शं वरुणः शं नो भवत्वर्यमा ।

शं न इन्द्रो बृहस्पतिः

शं नो विष्णुरुरुक्रमः ॥

नमो ब्रह्मणे नमस्ते वायो

त्वमेव प्रत्यक्षं ब्रह्मासि ।

त्वामेव प्रत्यक्षं ब्रह्म वदिष्यामि

ऋतं वदिष्यामि सत्यं वदिष्यामि

तन्मामवतु तद्वक्तारमवतु

अवतु माम् अवतु वक्तारम्

ॐ शान्तिः शान्तिः शान्तिः ॥

~o~

आ अथाऽनुलेपार्थं शिवमहिमस्तोत्रम् ॥

क्षेपकः ॥ "आधीनामगदं दिव्यं
व्याधीनां मूलकृन्तनम् । उपद्रवानां
दलनं महादेवमुपास्महे ॥

अहं पापी पापक्षपणनिपुणः शङ्कर!
भवानऽहं भीतो भीताऽभयवितरणे
ते व्यसनिता । अहं दीनो दीनो-
द्धरणविधिमज्जस्त्वमितरन्न जानेऽहं
वक्तुं कुरु सकलशोच्ये मयि
कृपाम् ॥२॥ जनास्त्वत्पादाब्जश्रवण-

मननध्याननिपुणाः स्वयं ते
निस्तीर्णा न खलु करुणा तेषु
करुणा। भवे लीने दीने मयि
मननहीने न करुणा कथं नाथ
ख्यातस्त्वमसि करुणासागर इति॥"
ॐ महिम्नः पारं ते परमऽविदुषो
यद्यऽसदृशी स्तुतिर्ब्रह्मादीनामपि
तदवसन्नास्त्वयि गिरः। अथाऽवाच्यः
सर्वः स्वमतिपरिणामावधि
गृणन्ममाप्येष स्तोत्रे हर निरपवादः

परिकरः ॥१॥ अतीतः पन्थानं तव
च महिमा वाङ्मनसयोरतद्व्यावृत्त्या यं
चकितमभिधत्ते श्रुतिरपि । स कस्य
स्तोतव्यः कतिविधगुणः कस्य विषयः
पदे त्ववार्चीने पतति न मनः कस्य
न वचः ॥२॥ मधुस्फीता वाचः
परमममृतं निर्मितवतस्तव ब्रह्मन् किं
वागऽपि सुरगुरोर्विस्मयपदम् । मम त्वेतां
वाणीं गुणकथनपुण्येन भवतः
पुनामीत्यर्थेऽस्मिन्पुरमथन । बुद्धिर्व्यवसिता ॥३॥

तवैश्वर्य्यं यत्तज्जगदुदयरक्षाप्रलयकृत्त्रयीवस्तु

व्यस्तं तिसृषु गुणभिन्नासु तनुषु ।

अभव्यानामस्मिन्वरद ! रमणीयामरमणीं

विहन्तुं व्याक्रोशीं विदधत इहैके

जडधियः ॥४॥ किमीहः किंकायः स

खलु किमुपायस्त्रिभुवनं किमाधारो

धाता सृजति किमुपादानमिति च ।

27 Sunday अतर्केश्वर्ये त्वय्यऽनवसरदुःस्थो

हतधियः कुतर्कोऽयं कांश्चिन्मुखरयति

मोहाय जगताम् ॥५॥ अजन्मानो

लोकाः किमवयववन्तोऽपि
जगतामधिष्ठातारं किं भवविधिरनादृत्य
भवति । अनीशो वा कुर्याद्भुवनजनने कः
परिकरो यतो मन्दास्त्वां प्रत्यमरवर
संशेरत इमे ॥६॥ त्रयी सांख्यं योगः
पशुपतिमतं वैष्णवमिति प्रभिन्ने प्रस्थाने
परमिदमदः पथ्यमिति च । रुचीनां
वैचित्र्यादृजुकुटिलनानापथजुषां नृणामेको
गम्यस्त्वमसि पयसामर्णव इव ॥७॥
महोक्षः खट्वाङ्गं परशुरजिनं भस्म

फणिनः कपालं चेतीयत्तव वरद
तन्त्रोपकरणम् । सुरास्तां तामृद्धिं
दधति तु भवद्भ्रूप्रणिहितां नहि
स्वात्मारामं विषयमृगतृष्णा भ्रमयति ॥८॥
ध्रुवं कश्चित्सर्वं सकलमपरस्तु
ध्रुवमिदं परो ध्रौव्याध्रौव्ये जगति
गदति व्यस्तविषये ।
समस्तेऽप्येतस्मिन्पुरमथन ! तैर्विस्मित
इव स्तवञ्जिह्रेमि / त्वां न खलु
ननु धृष्टा मुखरता ॥९॥ तवैश्वर्यं

यत्नाद्यदुपरि विरिञ्चो हरिरधः
परिच्छेत्तुं यातावनलमनलस्कन्दवपुषः
ततो भक्तिश्रद्धाभरगुरु गृणद्भ्यां
गिरिश ! यत्स्वयं तस्थे ताभ्यां तव
किमनुवृत्तिर्न फलति ॥१०॥
अयत्नादासाद्य त्रिभुवनमवैरिव्यतिकरं
दशास्यो यद्बाहूनभृत रणकण्डूपरवशान् ।
शिरःपद्मश्रेणीरचितचरणाम्भोरुहबलेः
स्थिरायास्त्वद्भक्तेस्त्रिपुरहर !
विस्फूर्जितमिदम् ॥११॥ अमुष्य

त्वत्सेवासमधिगतसारं भुजवनं
बलात्कैलासेपि त्वदधिवसतौ
विक्रमयतः। अलभ्या
पातालेऽप्यलसचलिताङ्गुष्ठशिरसि
प्रतिष्ठा त्वय्यासीद्ध्रुवमुपचितो
मुह्यति खलः ॥१२॥ यदृद्धिं
सुत्राम्णो वरद ! परमोच्चैरपि
सतीमधश्चक्रे बाणः
3 Sunday
परिजनविधेयत्रिभुवनः। न
तच्चित्रं तस्मिन्वरिवसितरि

त्वच्चरणयोर्न कस्याप्युन्नत्यै
भवति शिरसस्त्वय्यवनतिः ॥१३॥
अकाण्डब्रह्माण्डक्षयचकितदेवासुरकृपा-
विधेयस्यासीद्यस्त्रिनयन ! विषं
संहृतवतः । स कल्माषः कण्ठे तव
न कुरुते न श्रियमहो विकारोऽपि
श्लाघ्यो भुवनभयभङ्गव्यसनिनः ॥१४॥
असिद्धार्था नैव क्वचिदपि
सदेवासुरनरे निवर्तन्ते नित्यं
जगति जयिनो यस्य विशिखाः ।

स पश्यन्नीश त्वामितरसुरसाधा-
रणममूत्स्मरः स्मर्तव्यात्मा नहि
वशिषु पथ्यः परिभवः ॥१५॥
मही पादाघाताद्व्रजति सहसा
संशयपदं पदं विष्णोर्भ्राम्यद्भुज-
परिघरुग्णग्रहगणम् । मुहुर्द्यौर्दौ-
स्थ्यं यात्यनिभृतजटाताडिततटा
जगद्रक्षायै त्वं नटसि ननु
वामैव विभुता ॥१६॥ वियद्व्यापी
तारागणगुणितफेनोद्गमरुचिः

प्रवाहो वारां यः पृषतलघु
दृष्टः शिरसि ते । जगद्द्वीपाकारं
जलधिवलयं तेन कृतमित्यनेनैवोन्नेयं
धृतमहिम ! दिव्यं तव वपुः ॥१७॥
रथःक्षोणी यन्ता शतधृतिरगेन्द्रो
धनुरथो रथाङ्गे चन्द्रार्कौ
रथचरणपाणिः शर इति ।
दिधक्षोस्ते कोयं त्रिपुरतृणमाडम्बर-
विधिर्विधेयैः क्रीडन्त्यो न खलु
परतन्त्रा प्रभुधियः ॥१८॥

हरिस्ते साहस्रं कमलबलिमाधाय
पदयोर्यदेकोने तस्मिन्निजमुदहर-
न्नेत्रकमलम् । गतो भक्त्युद्रेकः
परिणतिमसौ चक्रवपुषस्त्रयाणां
रक्षायै त्रिपुरहर जागर्ति
जगताम् ॥१९॥ क्रतौ सुप्ते
जाग्रत्त्वमसि फलयोगे
क्रतुमतां क्व कर्म प्रध्वस्तं
फलति पुरुषाराधनमृते ।
अतस्त्वां सम्प्रेक्ष्य क्रतुषु

फलदानप्रतिभुवं श्रुतौ श्रद्धां
बद्ध्वा दृढपरिकरः कर्मसु जनः ॥२०॥
क्रियादक्षो दक्षः क्रतुपतिरधीश-
स्तनुभृतामृषीणामार्त्विज्यं शरणद !
सदस्याः सुरगणाः । क्रतुभ्रंशस्त्वत्तः
क्रतुफलविधानव्यसनिनो ध्रुवं कर्तुः
श्रद्धाविधुरमभिचाराय हि मखाः ॥२१॥
प्रजानाथं नाथ प्रसभमभिकं स्वां
दुहितरं गतं रोहिद्भूतां
रिरमयिषुमृष्यस्य वपुषा ।

धनुष्पाणेर्यातं दिवमपि
सपत्राकृतममुं त्रसन्तं तेऽद्यापि
त्यजति न मृगव्याधरभसः ॥२२॥
अपूर्वं लावण्यं विवसनतनोस्ते
विमृशतां मुनीनां दाराणां
समजनि स कोपव्यतिकरः ।
यतो भग्ने गुह्ये सकृदपि
सपर्यां विदधतां ध्रुवं
मोक्षोऽश्लीलं किमपि
पुरुषार्थप्रसवि ते ॥२३॥

स्वलावण्याशंसा धृतधनुष्यमह्नाय
तृणवत्पुरः प्लुष्टं दृष्ट्वा पुरमथन
पुष्पायुधमपि। यदि स्त्रैणं देवी
यमनिरत देहार्धघटनादवैति
त्वामद्धाबत वरद मुग्धा युवतयः
॥२४॥ श्मशानेष्वाक्रीडा स्मरहर
पिशाचाः सहचराश्चिताभस्मालेपः
स्रगपि नृकरोटीपरिकरः।
अमङ्गल्यं शीलं तव भवतु
नामैवमखिलं तथापि स्मर्तॄणां

वरद परमं मङ्गलमसि ॥२५॥

मनः प्रत्यक्चित्ते

सविधमवधायात्तमरुतः

प्रहृष्यद्रोमाणः

प्रमदसलिलोत्सङ्गितदृशः ।

यदालोक्याह्लादं ह्रद इव

निमज्ज्याऽमृतमये दधत्यन्तस्तत्त्वं

किमपि यमिनस्तत्किल भवान् ॥२६॥

त्वमर्कस्त्वं सोमस्त्वमसि

पवनस्त्वं हुतवहस्त्वमापस्त्वं

व्योम त्वमु धरणिरात्मा त्वमिति
च । परिच्छिन्नामेवं त्वयि परिणतां
बिभ्रतु गिरं न विद्मस्तत्तत्त्वं
वयमिह तु यत्त्वं न भवसि ॥२७॥

त्रयीं तिस्रो वृत्तीस्त्रिभुवनमथो
त्रीनपि सुरानकाराद्यैर्वर्णैस्त्रिभिरभिद-
धत्तीर्णविकृति । तुरीयं ते धाम
ध्वनिभिरवरुन्धानमणुभिः
समस्तव्यस्तं त्वां शरणद
गृणात्योमिति पदम् ॥२८॥

भवः शर्वो रुद्रः पशुपतिरथोग्रः
सह महांस्तथा भीमेशानाविति
यदभिधानाष्टकमिदम् ।
अमुष्मिन्प्रत्येकं प्रविचरति देव
श्रुतिरपि प्रियायास्मै धाम्ने
प्रणिहितनमस्योऽस्मि भवते ॥२९॥
वपुष्प्रादुर्भावादऽनुमितमिदं
जन्मनि पुरा पुरारे ! नैवाहं
क्वचिदपि भवन्तं प्रणतवान् ।
नमन्मुक्तः सम्प्रत्यतनुरहमग्रेऽप्यनति

मान्महेश ! क्षन्तव्यं तदिदमपराधद्वयमपि

॥३०॥ नमो नेदिष्ठाय प्रियदव

दविष्ठाय च नमो नमः क्षोदिष्ठाय

स्मरहर महिष्ठाय च नमः।

नमो वर्षिष्ठाय त्रिनयन

यविष्ठाय च नमो नमः

सर्वस्मै ते तदिदमति सर्वाय

च नमः ॥३१॥ बहलरजसे

विश्वोत्पत्तौ भवाय नमो नमः

प्रबलतमसे तत्संहारे हराय नमो

नमः । जनसुखकृते सत्वोद्रिक्तौ
मृडाय नमो नमः प्रमहसि
पदे निस्त्रैगुण्ये शिवाय
नमो नमः ॥३२॥ श्रीपुष्पदन्त
मुखपङ्कजनिर्गतेन स्तोत्रेण
किल्बिषहरेण हरप्रियेण ।
कण्ठस्थितेन पठितेन

समाहितेन सुप्राणितो भवति
भूतपतिर्महेशः ॥३३॥

अथ श्रीबहुरूपगर्भस्तोत्रम् ।

ॐ नमः स्वच्छन्दभैरवाय ॥

ब्रह्मादिकारणातीतं स्वशक्त्यानन्दनिर्भरम् ।
नमामि परमेशानं स्वच्छन्दं वीरनायकम् ॥
कैलासशिखरासीनं देवदेवं जगद्गुरुम् ।
पप्रच्छ प्रणता देवी भैरवं विगतामयम् ॥

"श्री देव्युवाच"

प्रायश्चित्तेषु सर्वेषु समयोल्लङ्घनेषु च ।
महाभयेषु घोरेषु तीव्रोपद्रवभूमिषु ॥
छिद्रस्थानेषु सर्वेषु सदुपायं वद प्रभो ! ।
येनानायासेन रहितो निर्दोषश्च भवेन्नरः ॥

"श्री भैरव उवाच"

शृणु देवि! परं गुह्यं रहस्यं परमाद्भुतम् ।
सर्वपापप्रशमनं सर्वदुःखनिवारणम् ॥
प्रायश्चित्तेषु सर्वेषु तीव्रेष्व्यपि विमोचनम् ।
सर्वच्छिद्रापहरणं सर्वार्तिविनिवारकम् ॥
समयोल्लङ्घने घोरे जपादेव विमोचनम् ।
भोगमोक्षप्रदं देवि! सर्वसिद्धिफलप्रदम् ॥
शतजाप्येन शुद्ध्यन्ति महापातकिनोऽपि ये ।
तदर्धं पातकं हन्ति तत्पादेनोपपातकम् ॥

कायिकं वाचिकं चैव मानसं स्पर्शदोषजम् ।
प्रमादादिच्छया वाऽपि सकृज्जाप्येन शुद्ध्यति ॥
यागारम्भे च यागान्ते पठितव्यं प्रयत्नतः ।
नित्ये नैमित्तिके काम्ये परस्याप्यात्मनोऽपि वा
निश्छिद्रकरणं प्रोक्तं स्वभावपरिपूरकम् ।
द्रव्यहीने मन्त्रहीने ज्ञानयोगविवर्जिते ॥
भक्तिश्रद्धाविरहिते शुद्धिशून्ये विशेषतः ।
मनोविक्षेपदोषे च विलोमे पशुवीक्षिते ॥
विधिहीने प्रमादे च जप्तव्यं सर्वकर्मसु ।
नातः परतरो मन्त्रो नातः परतरा स्तुतिः ॥

नातः परतरा काचित्सम्यक्प्रत्यङ्गिरा प्रिये!।
इयं समयविद्यानां राजराजेश्वरीश्वरि ! ॥
परमाऽप्यायनं देवि! भैरवस्य प्रकीर्तितम् ।
प्रीणनं सर्वदेवानां सर्वसौभाग्यवर्धनम् ॥
स्तवराजमिमं पुण्यं शृण्वष्वाऽवहिता प्रिये!।
("अस्य श्रीबहुरूपभट्टारकस्तोत्रस्य,
श्रीवामदेव ऋषिः, अनुष्टुपछन्दः,
श्रीबहुरूपभट्टारको देवता, आत्मनो
वाङ्मनःकायोपार्जितपापनिवारणार्थं
चतुर्वर्गसिद्ध्यर्थे पाठे विनियोगः ॥
अघोरमन्त्रेण न्यासं कृत्वा प्राणायामः॥")

वामे खेटकपाशशार्ङ्गविलसद्दण्डं च वीणाण्टिके
बिभ्राणं ध्वजमुद्गरौ स्तनिभदे व्यङ्कं कुठारं करे।
दक्षेस्य्यङ्कुशकन्दलेषुडमरून्वज्रत्रिशूलाभयान्-
स्थं शरवक्त्रमिन्दुधवलं स्वच्छन्दनाथं स्तुमः ॥

त्रिपञ्चनयनं देवं जटामुकुटमण्डितम् ।
चन्द्रकोटिप्रतीकाशं चन्द्रार्धकृतशेखरम् ॥
पञ्चवक्त्रं विशालाक्षं सर्पगोनासमण्डितम् ।
वृश्चिकैरग्निवर्णाभैर्हारेण तु विराजितम् ॥
कपालमालाभरणं खड्गखेटकधारिणम् ।
पाशाङ्कुशधरं देवं शरहस्तं पिनाकिनम् ॥

वरदाभयहस्तं च मुण्डखट्वाङ्गधारिणम् ।
वीणाडमरुहस्तं च घण्टाहस्तं त्रिशूलिनम् ॥
वज्रदण्डकृताटोपं परश्वायुधहस्तकम् ।
मुद्गरेण विचित्रेण वर्तुलेन विराजितम् ॥
सिंहचर्मपरीधानं गजचर्मोत्तरीयकम् ।
अष्टादशभुजं देवं नीलकण्ठं सुतेजसम् ॥
ऊर्ध्ववक्त्रं महेशानि स्फटिकाभं विचिन्तयेत् ।
आपीतं पूर्ववक्त्रं तु नीलोत्पलदलप्रभम् ॥
दक्षिणं तु विजानीयाद्वामं चैव विचिन्तयेत् ।
दाडिमीकुसुमप्रख्यं कुङ्कुमोदकसंनिभम् ॥

चन्द्रार्बुदप्रतीकाशं पश्चिमं तु विचिन्तयेत् ।
स्वच्छन्दभैरवं देवं सर्वकामफलप्रदम् ॥
ध्यायेद्दै यस्तु युक्तात्मा क्षिप्रंसिध्यति मानवः ।
या सा पूर्वं मया ख्याता अघोरी शक्तिरुत्तमा ॥
भैरवं पूजयित्वा तु तस्योत्सङ्गगतां स्मरेत् ।
यादृशं भैरवं रूपं भैरव्यास्तादृगेव हि ॥
ईषत्करालवदनां गम्भीरविपुलस्वनाम् ।
प्रसन्नास्यां सदा ध्यायेद्भैरवीं विस्मितेक्षणाम् ॥

ॐ बहुरूपाय विद्महे कोटराक्षाय धीमहि। तन्नो घोरः प्रचोदयात्॥३॥

~०~

("मूलं। अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यश्च। सर्वतः शर्व सर्वेभ्यो नमस्ते रुद्ररूपेभ्यः") ॥१०८॥

ॐ श्रीभैरवः॥

ॐ नमः परमाकाशशायिने परमात्मने।
शिवाय परसंशान्तनिरानन्दपदाय ते॥
अवाच्यायाप्रमेयाय प्रमात्रे विश्वहेतवे।
महासामान्यरूपाय सत्तामात्रैकरूपिणे॥
घोषादिदशधाशब्दबीजभूताय शम्भवे।
नमः शान्तोग्रघोरादिमन्त्रसंरम्भगर्भिणे॥

रेवतीसङ्गविस्रम्भसमाश्लेषविलासिने ।
नमः समरसास्वादपरानन्दोपभोगिने ॥
भोगपाणि नमस्तुभ्यं योगीशैः पूजितात्मने ।
द्वयनिर्दलनोद्योगसमुल्लासितमूर्तये ॥
थरत्प्रसरविक्षोभविस्पृष्टाखिलजन्तवे ।
नमो मायास्वरूपाय स्थाणवे परमेष्ठिने ॥
घोरसंसारसंभोगदायिने स्थितिकारिणे ।
कलादिक्षितिपर्यन्तपालिने विभवे नमः ॥
रेहणाय महामोहध्वान्तविध्वंसहेतवे ।
हृदयाम्भोजसंकोचभेदिने शिवभानवे ॥

भोगमोक्षफलप्राप्तिहेतुयोगविधायिने ।
नमः परमनिर्वाणदायिने चन्द्रमौलये ॥
घोष्याय सर्वमन्त्राणां सर्ववाङ्मयमूर्तये ।
नमः सर्वाय शर्वाय सर्वपापापहारिणे ॥
रवणाय रवान्ताय नमस्ते रावरातिणे ।
नित्याय सुप्रबुद्धाय सर्वान्तरतमाय ते ॥
घोषाय परनादान्तश्चराय खचराय ते ।
नमो वाक्पतये तुभ्यं भवाय भवभेदिने ॥
रमणाय रतीशाङ्गदाहिने चित्रकर्मिणे ।
नमः शैलसुताभर्त्रे विश्वकर्त्रे महात्मने ॥

नमः पारप्रतिष्ठाय सर्वान्तपदगाय ते।
नमः समस्ततत्त्वाध्वव्यापिने चित्स्वरूपिणे॥
रेवद्दराय रुद्राय नमस्ते रूपरूपिणे।
परापरपरिस्पन्दमन्दिराय नमो नमः॥
भरिताखिलविश्वाय योगगम्याय योगिने।
नमः सर्वेश्वरेशाय महाहंसाय शम्भवे॥
चर्व्याय चर्वनीयाय चर्वकाय चराय ते।
रवीन्दुसन्धिसंस्थाय महाचक्रेश ते नमः॥
सर्वानुस्यूतरूपाय सर्वाच्छादकशक्तये।
सर्वभक्षाय शर्वाय नमस्ते सर्ववेदिने॥

रम्याय वल्लभाक्रान्तदेहार्धाय वियोगिने ।
नमः प्रपन्नदुष्प्राप्यसौभाग्यफलदायिने ॥
तन्महेशाय तत्त्वार्थवेदिने भववेदिने ।
महाभैरवनाथाय भक्तिगम्याय ते नमः ॥
शक्तिगर्भप्रबोधाय शरण्यायाऽशरीरिणे ।
शान्तिपुष्ट्यादिसाध्यार्थसाधकाय नमोऽस्तु ते ॥
रक्तकुण्डलिनीगर्भप्रबोधप्राप्तशक्तये ।
उत्स्फोटनापटुप्रौढपरमाक्षरमूर्तये ॥
समस्तव्यस्तसंग्रस्तरश्मिजालोदरात्मने ॥
नमस्तुभ्यं महामीनरूपिणे विश्वगर्भिणे ॥

रेवारणिसमुद्भूतवह्निज्वालातभासिने ।
घनीभूतविकल्पात्मविश्वबन्धातिलापिने ॥
भोगिनीस्यन्दनारूढिप्रौढिमालब्धगर्विणे ।
नमस्ते सर्वभक्ष्याय परमामृतलाभिने ॥
णफकोटिसमावेशभरिताखिलसृष्टये ।
नमः शक्तिशरीराय कोटिद्वितयसङ्गिने ॥
महामोहमलाक्रान्तजीववर्गावबोधिने ।
महेश्वराय जगतां नमः कारणबन्धवे ॥
स्तेनोन्मूलनदक्षैकस्मृतये विश्वमूर्तये ।
नमस्तेऽस्तु महादेवनाम्ने परस्वधाम्ने ॥

रुग्द्राविणे महावीर्यरुरुवंशविनाशिने ।
रुद्राय द्रावितारोषबन्धनाय नमोऽस्तु ते ॥
द्रवत्सररसास्वादचर्वणोद्युक्तशक्तये ।
नमस्त्रिदशपूज्याय सर्वकारणहेतवे ॥
रूपातीत नमस्तुभ्यं नमस्ते बहुरूपिणे ।
त्र्यम्बकाय त्रिधामान्तश्चारिणे चित्रचक्षुषे ॥
पेशलोपायलभ्याय भक्तिभाजां महात्मनाम् ।
दुर्लभाय मलाक्रान्तचेतसां तु नमोनमः ॥
भवप्रदाय दुष्टानां भवाय भवभेदिने ।
भव्यानां तन्मयानां तु सर्वदाय नमोनमः ॥

अणूनां मुक्तये घोरघोरसंसारदायिने।
घोरातिघोरमूढानां तिरस्कर्त्रे नमोनमः॥

सर्वकारणकलापकल्पितो-
ल्लाससंकुलसमाधिविष्ठराम्।
हार्दकोकनदसंस्थितामपि
तां प्रणौमि शिववल्लभामजाम्॥
सर्वजन्तुहृदयाब्जमण्डलो-
द्भूतभावमधुपानलुम्पटाम्।
वर्णभेदविभवान्तरस्थितां
तां प्रणौमि शिववल्लभामजाम्॥

ॐ

श्रीक्रमस्तोत्र

कौलार्णवानन्दघनोर्मिरूपा-
मुन्मेषमेषोभयभाजमन्तः ।
निलीयते नीलकुलालये या
तां सृष्टिकालीं सततं नमामि ॥१॥

महाविनोदार्पितमातृचक्र-
वीरेन्द्रकासृग्रसपानसक्ताम् ।
रक्तीकृतां च प्रलयात्यये तां
नमामि विश्वाकृतिरक्तकालीम् ॥२॥

वाजिद्वयस्वीकृतवातचक्र-
प्रक्रान्तसंघट्टगमागमस्थाम् ।
शुचिर्यथारतं गमितोऽर्चिषा तां
शान्तां नमामि स्थितिनाशकालीम् ॥३॥
सर्वार्थसंकर्षणसंयमस्य
यमस्य यन्तुर्जगतो यमाय ।
वपुर्महाग्रासविलासरागात्
संकर्षयन्तीं प्रणमामि कालीम् ॥४॥
उन्मन्यनन्ता निखिलार्थगर्भा
या भावसंहारनिमेषमेति ।

सदोदिता सत्युदयाय शून्यां
संहारकालीं मुदितां नमामि ॥५॥
ममेत्यहंकारकलाकलाप-
विस्फारहर्षोद्धतगर्वमृत्युः ।
ग्रस्तो यया घम्मरसंविदं तां
नमामि कालोदितमृत्युकालीम् ॥६॥
विश्वं महाकल्पविरामकल्प-
भवान्तभीमभ्रुकुटिभ्रमन्त्या ।
याश्नात्यनन्तप्रभवार्चिषा तां
नमामि भद्रां शुभभद्रकालीम् ॥७॥

6 Sunday

मार्तण्डमापीतपतङ्गचक्रं
पतङ्गवत्कालकलेन्धनाय ।
करोति या विश्वरसान्तकां तां
मार्तण्डकालीं सततं प्रणौमि ॥८॥

अस्तोदितद्वादशभानुभाजि
यस्यां गता भर्गशिखा शिखेव ।
प्रशान्तधाम्नि द्युतिनाशमेति
तां नौम्यनन्तां परमार्ककालीम् ॥९॥

कालक्रमाक्रान्तदिनेशचक्रा-
क्रोडीकृतान्ताग्निकलाप उग्रः ।

कालाग्निरुद्रो लयमेति यस्यां
तां नौमि कालानलरुद्रकालीम् ।
नक्तं महाभूतलये श्मशाने
दिग्खेचरीचक्रगणेन साकम् ।
कालीं महाकालमलं ग्रसन्तीं
वन्दे ह्यचिन्त्यामनिलानलाभाम् ।
॥११॥
क्रमत्रयत्वाष्ट्रमरीचिचक्र-
सञ्चारचातुर्यतुरीयसत्ताम् ।
वन्दे महाभैरवघोरचण्ड-
कालीं कलाकाशशशाङ्ककांतिम् ॥१२॥

~०~